४६ सुन्दरी ४७ अस्थितभ्रूः ४८ ललिता ४९ हसिता ५० भामिनी ५१ वरारोहा ५२ मताङ्गी ५३ विनता ५४ वरा ५५ श्यामा ५६ चारुवर्द्धना ५७। इति राजनिर्घण्टः ॥ * ॥ सा चतुर्व्विधा। पद्मिनी१ चित्रिणी२ शङ्खिनी ३ हस्तिनी ४। तासां लक्षणानि यथा,—

"भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी।
मृदुवचनसुशीला नृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥ १ ॥
भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा ॥२॥
दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥३॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया च
नितम्बखर्व्वा खलु हस्तिनी सा ॥ ४ ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।
शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी ॥
शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी।
वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी ॥
पद्मिनी शशयोर्योनिमेढ्रकौ चतुरङ्गुलौ।
चित्रिणीमृगयोर्योनिमेढ्रकौ च तथाविधौ ॥
शङ्खिनीवृषयोरष्टाङ्गुलौ तावेव सम्मतौ।
हस्तिनीवाजिनोरेव तावेव द्वादशाङ्गुलौ॥"॥

तस्या अवस्था यथा,—
"आ षोड़शात् भवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशतं यावत् प्रौढ़ा वृद्धा ततः परम् ॥"
इति रसमञ्जरी ॥ * ॥
"बाला तु प्राणदा प्रोक्ता युवती प्राणधारिणी
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्ब्बाला प्रौढ़ा वर्षावसन्तयोः।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥
नार्त्तवे षोड़शाद्वर्षात् सप्तत्याः परतो न च।
आयुःकामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
त्रिभिस्त्रिभिरहोभिश्च सेवेत प्रमदां नरः।
सर्व्वेष्वृतुषु ग्रीष्मेषु पक्षान्मासाद्व्रजेद्बुधः ॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान्।
द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययात् ॥"
इति राजवल्लभे रात्रिकृत्यम् ॥*॥

स्त्रियाः शुभाशुभलक्षणानि यथा,—
श्रीहरिरुवाच।
"यस्यास्तु कुञ्चिताः केशा मुखञ्च परिमण्डलम्
नाभिश्च दक्षिणावर्त्ता सा कन्या कुलवर्द्धिनी ॥
या च काञ्चनवर्णाभा रक्तहस्तसरोरुहा।
सहस्राणान्तु नारीणां भवेत् सापि पतिव्रता ॥
वक्रकेशा च या कन्या मण्डलाक्षी च या भवेत्
भर्त्ता च म्रियते तस्या नियतं दुःखभागिनी ॥
पूर्णचन्द्रमुखी कन्या बालसूर्य्यसमप्रभा।
विशालनेत्रा बिम्बोष्ठी सा कन्या लभते सुखम्॥
रेखाभिर्ब्बहुभिः क्लेशं स्वल्पाभिर्धनहीनताम्।
रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्॥
कार्य्येऽपि मन्त्री पत्नी स्यात् सखी स्यात् करणेषु च।
स्नेहेषु भार्य्या माता स्यात् वेश्या च शयने शुभा ॥
अङ्कुशं कुण्डलं चक्रं यस्याः पाणितले भवेत्।"
पुस्तकान्तरे चक्रं स्थाने छत्रमिति च पाठः।
"पुत्त्रं प्रसूयते नारी नरेन्द्रं लभते पतिम् ॥
यस्यास्तु रोमशौ पार्श्वौ रोमशौ च पयोधरौ।
उन्नतौ चाधरौष्ठौ च क्षिप्रं मारयते पतिम ॥
यस्याः पाणितले रेखा प्राकारं तोरणं भवेत्।
अपि दासकुले जाता राज्ञीत्वमुपगच्छति ॥
उद्वृत्तकपिला यस्या रोमराजी निरन्तरम्।
अपि राजकुले जाता दासीत्वमुपजायते ॥
यस्या अनामिकाङ्गुष्ठौ पृथिव्यां नैव तिष्ठतः।
पतिं मारयते क्षिप्रं स्वातन्त्र्येणैव वर्त्तते ॥
यस्या गमनमात्रेण भूमिकम्पः प्रजायते।
पतिं मारयते क्षिप्रं स्वेच्छाचारेण वर्त्तते ॥
चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम्।
त्वचः स्नेहेन शय्याञ्च पादस्नेहेन वाहनम् ॥
स्निग्धोन्नतौ ताम्रनखौ नार्य्याश्च चरणौ शुभौ।
मत्स्याङ्कुशाब्जचिह्नौ च चक्रलाङ्गललक्षितौ ॥
अस्वेदिनौ मृदुतलौ प्रशस्तौ चरणौ स्त्रियाः।
शुभे जङ्घे विरोमे च ऊरू हस्तिकरोपमौ ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्।
नाभिः प्रशस्ता गम्भीरा दक्षिणावर्त्तिका शुभा
अरोमा त्रिवली नार्य्या वृत्तस्तनौ रोमवर्जितौ॥
इति गारुड़े नरस्त्रीलक्षणम् ६४ अध्यायः ॥

तस्याश्चरित्रं यथा,—
"विषकुम्भाकाररूपाममृतास्याञ्च सन्ततम्।
हृदये क्षुरधाराभां शश्वन्मधुरभाषिणीम् ॥
स्वकार्य्यपरिनिष्पन्नतत्परां सततं सदा।
स्वान्तर्मलिनरूपाञ्च प्रसन्नवदनेक्षणाम् ॥
श्रुतौ पुराणे यासाञ्च चरित्रमनिरूपितम्।
तासु को विश्वसेत् प्राज्ञः अप्राज्ञाश्च दुराशयाम्॥
तासां को वा रिपुर्म्मित्रं प्रार्थयन्ती नवं नवम्"
दृष्ट्वा सुवेशं पुरुषमिच्छन्ती हृदये सदा ॥
बाह्ये स्वात्मसतीत्वञ्च पापयन्ती प्रयत्नतः।
शश्वत्कामाञ्च वामाञ्च कामाधारां मनोहराम्॥
बाह्ये भावं छादयन्तीं स्वान्तर्म्मैथुनमानसाम्।
कान्तं ग्रसन्तीं रहसि बाह्येऽतीव सुलज्जिताम्॥
मानिनीं मैथुनाभावे कोपनां कलहाङ्कुराम्।
सुप्रीतां भूरिसंयोगात् स्वल्पमैथुनदुःखिताम् ॥
सुमिष्टान्नात् शीततोयादाकाङ्क्षन्तीञ्च मानसः।
सुन्दरं रसिकं कान्तं युवानं गुणिनं सदा ॥
सुतात् परमपि स्नेहं कुर्व्वतीं रतिकर्त्तरि।
प्राणाधिकं प्रियतमं सम्भोगकुशलं प्रियम्।
पश्यन्तीं रिपुतुल्यञ्च वृद्धं वा मैथुनाक्षमम्।
कलहं कुर्व्वतीं शश्वत् तेन सार्द्धं सुकोपनाम् ॥
चर्व्वया भक्षयन्तीं तं कीनाश इव गोजरम्।
दुःसाहसस्वरूपाञ्च सर्व्वदोषाश्रयां सदा ॥
शश्वत् कपटरूपाञ्च दुःसाध्यमप्रतीतकाम्।
ब्रह्मविष्णुशिवादीनां दुस्त्याज्यां मोहकारिणीम् ॥
तपोमार्गार्गलां शश्वत् मुक्तिमार्गकपाटिकाम्।
हरेर्भक्तिव्यवहितां सर्व्वमायाकरण्डिकाम् ॥
संसारकारागारे च शश्वन्निगड़रूपिणीम्।
इन्द्रजालस्वरूपाञ्च मिथ्यातिस्वप्नरूपिणीम् ॥
बिभ्रतीं बाह्यसौन्दर्य्यमधोऽङ्गमतिकुत्सितम्।
लालाविण्मूत्रपूयानामाधारं मलसंयुतम्।
दुर्गन्धिदोषसंयुक्तं रक्ताक्तकमसंस्कृतम् ॥
मायारूपां मायिनाञ्च विधिना निर्म्मितां पुरा
विषरूपां मुमुक्षूणामदृश्यामप्यवाञ्छिताम ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः॥*॥

तस्या निन्दा यथा,—
"दुर्निवार्य्यश्च सर्व्वेषां स्त्रीस्वभावश्च चापलः।
दुस्त्याज्यं योगिभिः सिद्धै रस्माभिश्च तपस्विभिः॥
जितेन्द्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणम्।
सर्व्वमायाकरण्डञ्च कामवर्द्धनकारणम् ॥
ब्रह्मास्त्रं कामदेवस्य दुर्भेद्यं जयकारणम्।
सुनिर्म्मितञ्च विधिना सर्व्वाद्यं ब्रह्मपूर्व्वजम् ॥
मोक्षद्वारकवाटञ्च हरिभक्तिविरोधनम्।
संसारबन्धनस्तम्भरज्जुरूपमकृन्तनम् ॥
वैराग्यनाशबीजञ्च शश्वद्रागविवर्द्धनम्।
पत्तनं साहसानाञ्च दोषाणामालयं सदा ॥
अप्रत्ययानां क्षेत्रञ्च स्वयं कपटमूर्त्तिमत्।
अहङ्काराश्रयं शश्वद्विषकुम्भं सुधामुखम् ॥
सर्व्वैरसाध्यमानञ्च दुराराध्यञ्च सर्व्वदा।
स्वकार्य्यसाध्यं चाराध्यं कलहाङ्कुरकारणम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ६।५५—६१॥

स्त्रीसंसर्गयुक्तपुंदर्शननिषेधो यथा,—
"रहःस्थलनियुक्तश्च न दृश्यः स्त्रीयुतः पुमान्।
स्त्रीसंसक्तञ्च पुरुषं यः पश्यति नराधमः ॥
करोति रसभङ्गं वा कालसूत्रं व्रजेत् ध्रुवम्।
तत्र तिष्ठति पापीयान् यावच्चन्द्रदिवाकरौ ॥
विशेषतश्च पितरं गुरुं वा भूमिपं द्विज।
रहःसु रतिसंसक्तं न हि पश्येद्विचक्षणः ॥
कामतः कोपतो वापि यः पश्येत्सुरतोन्मुखम्।
स्त्रीविच्छेदो भवेत्तस्य ध्रुवं सप्तसु जन्मसु ॥
श्रोणीं वक्षःस्थलं वक्त्रं यः पश्यति परस्त्रियाः।
कामतो वापि मूढ़श्च षण्ढो भवति निश्चितम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे।४२।१०—१४॥

सा च त्रिभी रक्षितव्या यथा,—
"स्त्रीजातिरबला शश्वद्रक्षणीया स्वबन्धुभिः।
जनकस्वामिपुत्त्रैश्च गर्हितान्यैश्च निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।४।१८॥*॥
अपि च।
"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्त्रश्च स्थाविरे रक्षेत् न स्त्री स्वातन्त्र्यमर्हति॥"
इति दायतत्त्वम् ॥*॥